# Shrihanumatkalpa

# શ્રીહનુમત્કલ્પઃ

## Document Information

Text title : Hanumatkalpa from Tantrasara

File name : hanumatkalpatantrasAra.itx

Category : hanumaana

Location : doc_hanumaana

Proofread by : NA

Description-comments : hanumad rahasyam, hanumad upAsanA

Latest update : June 17, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીહનુમત્કલ્પઃ

દેવ્યુવાચ ।
શૈવાદિગાણપત્યાદિશાક્તાનિ વૈષ્ણવાનિ ચ ।
સાધનાનિ ચ સૌરાણિ ચાન્યાનિ યાનિ કાનિ ચ ॥ ૧॥

એતાનિ દેવદેવેશ ત્વદુક્તાનિ શ્રુતાનિ ચ ।
કિઞ્ચિદન્યચ્ચ દેવાનાં સાધનં યદિ કથ્યતામ્ ॥ ૨॥

શઙ્કર ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ સાવધાનાવધારય ।
હનુમત્સાધનં પુણ્યં મહાપાતકનાશનમ્ ॥ ૩॥

એતદ્ ગુહ્યતમં લોકે શીઘ્રસિદ્ધિકરં પરમ્ ।
જપો યસ્ય પ્રસાદેન લોકત્રયજિતો ભવેત્ ॥ ૪॥

તત્સાધનવિધિં વક્ષ્યે નૃણાં સિદ્ધિકરં મતમ્ ।
હુઙ્કારમાદૌ સમ્પ્રોક્તં હનુમતે તદનન્તરમ્ ।
રુદ્રાત્મકાય હું ચૈવ ફડિતિ દ્વાદશાક્ષરમ્ ॥ ૫॥

હું હનુમતે રુદ્રાત્મકાય હું ફટ્ ॥

એતન્મન્ત્રં સમાખ્યાતં ગોપનીયં પ્રયત્નતઃ ।
તવ સ્નેહેન ભક્ત્યા ચ દદામિ તવ સુન્દરિ ॥ ૬॥

એતન્મન્ત્રમર્જુનાય પુરા દત્તં તુ શૌરિણા ।
જપેન સાધનં કૃત્વા જિતં સર્વં ચરાચરમ્ ॥ ૭॥

નદીકૂલે વિષ્ણુગેહે નિર્જને પર્વતે વને ।
એકાગ્રચિત્તમાધાય સાધયેત્ સાધનં મહત્ ॥ ૮॥

ધ્યાનમ્ ।
મહાશૈલં સમુત્પાટ્ય ધાવન્તં રાવણં પ્રતિ ।

તિષ્ઠ તિષ્ઠ રણે દુષ્ટ મમ જીવન્ન મોક્ષ્યસે ॥ ૯॥

ઇતિ બ્રુવન્તં કોપેન ક્રોધરક્તમુખામ્બુજમ્ ।
ભોગીન્દ્રાભં સ્વલાઙ્ગૂલમુત્ક્ષિપન્તં મુહુર્મુહુઃ ॥ ૧૦॥

લાક્ષારક્તારુણં રૌદ્રં કાલાન્તકયમોપમમ્ ।
જ્વલદગ્નિસમં નેત્રં સૂર્યકોટિસમપ્રભમ્ ॥ ૧૧॥

અઙ્ગદાદ્યૈર્મહાવીરૈર્વેષ્ટિતં રુદ્રરૂપિણામ્ ।
એવં રૂપં હનૂમન્તં ધ્યાત્વા યઃ પ્રજપેન્મનુમ્ ॥ ૧૨॥

લક્ષજાપાત્પ્રસન્નઃ સ્યાત્ સત્યં તે કથિતં મયા ।
ધ્યાનૈકમાશ્રિતાનાં ચ સિદ્ધિરેવ ન સંશયઃ ॥ ૧૩॥

પ્રાતઃ સ્નાત્વા નદીતીર ઉપવિશ્ય કુશાસને ।
પ્રાણાયામં ષડઙ્ગં ચ મૂલેન સકલં ચરેત્ ॥ ૧૪॥

પુષ્પાઞ્જલ્યષ્ટકં દત્ત્વા ધ્યાત્વા રામં સસીતકમ્ ।
તામ્રપાત્રે તતઃ પદ્મમષ્ટપત્રં સકેસરમ્ ॥ ૧૫॥

રક્તચન્દનઘૃષ્ટેન લિખેત્તસ્ય શલાકયા ।
કર્ણિકાયાં લિખેન્મન્ત્રં તત્રાવાહ્ય કપિં પ્રભુમ્ ॥ ૧૬॥

કર્ણિકાયાં યજેદ્દેવં દત્ત્વા પાદ્યાદિકં તતઃ ।
ગન્ધપુષ્પાદિકં ચૈવ નિવેદ્ય મૂલમન્ત્રતઃ ॥ ૧૭॥

સુગ્રીવં લક્ષ્મણં ચૈવ અઙ્ગદં નલનીલકમ્ ।
જામ્બવન્તં ચ કુમુદં કેસરિણં દલે દલે ॥ ૧૮॥

પૂર્વાદિક્રમતો દેવિ પૂજયેદ્ ગન્ધચન્દનૈઃ ।
પવનં ચાઞ્જનીં ચૈવ પૂજયેદ્ દક્ષવામતઃ ॥ ૧૯॥

દલાગ્રેષુ ક્રમાત્પૂજ્યા લોકપાલાસ્તતઃ પરમ્ ।
ધ્યાત્વા જપેન્મન્ત્રરાજં લક્ષં યાવચ્ચ સાધકઃ ॥ ૨૦॥

લક્ષાન્તે દિવસં પ્રાપ્ય કુર્યાચ્ચ પૂજનં મહત્ ।
એકાગ્રમનસા ધીમાંસ્તસ્મિન્ પવનનન્દને ॥ ૨૧॥

દિવારાત્રૌ જપં કુર્યાદ્ યાવત્સન્દર્શનં ભવેત્ ।
સુદૃઢં સાધકં મત્વા નિશીથે પવનાત્મજઃ ॥ ૨૨॥

સુપ્રસન્નસ્તતો ભૂત્વા પ્રયાતિ સાધકાગ્રતઃ ।
યથેપ્સિતં વરં દત્ત્વા સાધકાય કપિપ્રભુઃ ॥ ૨૩॥

સર્વસૌખ્યમવાપોન્તિ વિહરેદાત્મનઃ સુખૈઃ ।
એતચ્ચ સાધનં પુણ્યં દેવાનામપિ દુર્લભમ્ ।
તવ સ્નેહાત્ સમાખ્યાતં ભક્તાસિ યદિ પાર્વતિ ॥ ૨૪॥

વીરસાધનમ્ ।
હનુમતોઽતિગુહ્યં ચ લિખ્યતે વીરસાધનમ્ ।
બાહ્યે મુહુર્ત ઉત્થાય કૃતનિત્યક્રિયો દ્વિજઃ ॥ ૨૫॥

ગત્વા નદીં તતઃ સ્નાત્વા તીર્થમાવાહ્ય ત્વષ્ટધા ।
મૂલમન્ત્રં તતો જપ્ત્વા સંસિક્તો નિત્યસઙ્ખ્યયા ॥ ૨૬॥

તતો વાસઃ પરીધાય ગઙ્ગાતીરેઽથવા શુચૌ ।
ઉપવિશ્ય ।
ૐ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હૃદયાય નમ ઇત્યાદિના ચ કરાઙ્ગન્યાસૌ કુર્યાત્ ।

કરન્યાસઃ -
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અઙ્ગન્યાસઃ -
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હું ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ।

પ્રાણાયામઃ ।
અકારાદિવર્ણાનુચ્ચરન્વામનાસાપુટેન વાયું પૂરયેત્ ।

પઞ્ચવર્ગાનુચ્ચરત્કુમ્ભયેત્, યકારાદ્યેન રેચયેત્ ॥

એવં વારત્રયં કૃત્વા મન્ત્રવર્ણૈરઙ્ગન્યાસ કુર્યાત્ ।

ધ્યાનમ્ ।
ધ્યાયેદ્રણે હનૂમન્તં કપિકોટિસમન્વિતમ્ ।
ધાવન્તં રાવણં જેતું દૃષ્ટ્વા સત્વરમાગતમ્ ॥ ૨૭॥

લક્ષ્મણં ચ મહાવીરં પતિતં રણભૂતલે ।
ગુરું ચ ક્રોધમુત્પાદ્ય ગૃહીત્વા ગુરુપર્વતમ્ ॥ ૨૮॥

હાહાકારૈઃ સદર્પૈશ્ચ કમ્પયન્તં જગત્રયમ્ ।
આબ્રહ્માણ્ડસમપ્રસ્થં કૃત્વા ભીમં કલેવરમ્ ॥ ૨૯॥

મન્ત્રઃ ।
શ્રીબીજં પૂર્વમુચ્ચાર્ય પવનં ચ તતો વદેત્ ।
નન્દનં ચ તતો દેયં ઙેડવસાનેઽનલપ્રિયા ॥

શ્રીપવનનન્દનાય સ્વાહા ॥ ૩૦॥

દશાર્ણોઽયં મનુઃ પ્રોક્તો નરાણાં સુરપાદપઃ ।
સપ્તદિવસં મહાભયં દત્ત્વા ત્રિભાગશેષાસુ નિશાસુનિયતમાગચ્છતિ ।
યદિ સાધકો માયાં તરતિ ઈપ્સિતં વરં પ્રાપ્નોતિ ॥

વિદ્યા વાપિ ધનં વાપિ રાજ્યં વા શત્રુનિગ્રહમ્ ।
તત્ક્ષણાદેવ પ્રાપ્નોતિ સત્યં સત્યં સુનિશ્ચિતમ્ ॥ ૩૧॥

॥ ઇતિ તન્ત્રસારોક્ત શ્રીહનુમત્કલ્પઃ સમાપ્તઃ ॥

NA

*Shrihanumatkalpa*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*